सूर्य्यकिरणासंपर्कादृदीप्तायां, ४ पञ्चदश्यां कलायाम् न मीयते दृश्यते विधुरत्र । ५ अमावस्यायां तिथौ च स्त्री । "अमार्कपाते श्रवणं यदि स्यात्" "यद्यमा रविवारेण" इति च प्रा०त०पुरा० । "अमायां तु सदा सोम-ओषधीः प्रतिपद्यते" इति सोमो० । न मीयतेऽसौ मा—कर्मणि क्विप् । ६ आत्मनि पु० । ७ मानशून्ये त्रि० । ८ गृहे अव्य० निरु० । "काममरतामममा भूते" ऋ० २,३८,६ । "अमा गृहमिति" भा० । अम्यते गम्यते चन्द्रलोकात् अत्र अम—आधारे—घञ् वा ह्रस्वः । ९ इहलोके । "अमातोमरुतोवि आन्तरिक्षादमायुत" ऋ०५,५०,५८ । "अमातः अस्माल्लोकात्" भा० । तत्र यावत्सम्पातमुषित्वा "क्षीणे पुण्ये मर्त्यलोकं विशन्तीति" श्रुतौ चन्द्रलोकादेव इह लोकागमनात्तथात्वम् । [दुर्बलः ।

**अमांस** त्रि० नास्ति मांसं यस्य । १ दुर्बले । मांसहीनो हि

**अमात्य** पु० अमा सह वसति त्यक् । मन्त्रिणि । तस्य दण्डनीतौ राजसहचरत्वात्तथात्वम् । "पुरोहितामात्यमुखाश्च योधाः" भट्टिः । "अमात्यपुत्रैः सवयोभिरन्वितः" रघुः । "अमात्ये दण्ड आयत्त" इति मनुः "अमात्यव्यञ्जना राज्ञां दूष्यास्ते शत्रुसंहिताः" माघः । अमात्यलक्षणमुक्तं हेमा० विष्णुध० पु० । "सर्व्वतन्त्रलक्षणो मन्त्री राज्ञस्तथा भवेत् । ब्राह्मणो वेदतत्त्वज्ञोविनीतः प्रियदर्शनः । कुललक्ष्मे महात्मा च स्वामिभक्तः प्रियंवदः । बृहस्पत्युशनःप्रोक्तां नीतिं जानाति सर्व्वतः । रागद्वेषेण यः कार्यं न च हन्ति महीक्षितः । लोकापवादाद्राजार्थे भयं यस्य न विद्यते । क्लेशक्षमस्तु धर्म्मात्मा विजितात्मा जितेन्द्रियः । गूढमन्त्रश्चाऽश्वदक्षः प्राज्ञो भक्तजनप्रियः । इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः । शूरश्च ज्ञातविद्यश्च न मानी न च मत्सरी । चारप्रचारकुशलः प्रणिधिप्राप्त आत्मवान् । षाड्गुण्यविधितत्त्वज्ञ उपायकुशलस्तथा । वेत्ता विधाता कार्य्याणां नैव कार्य्यातिपातनः । समयज्ञश्च कालज्ञो भृत्यानाञ्च गुणप्रियः । कृतानामकृतानां च कर्मणामन्ववेक्षिता । यथा पुरुषमर्हाणां पुरुषाणां नियोजकः । कर्त्ता परोक्षे कार्य्याणि सांपराये भृगूत्तम । तत्त्वातत्त्ववेदिता च कर्मणो गुरुलाघवम् । शत्रुमित्रविभागज्ञो विग्रहे चैव तत्त्ववित् स राज्ञः सर्व्वकार्य्याणि कुर्याद्भृगुकुलोद्वह । विदितानि तथा कुर्याज्ज्ञातानि महीक्षिता अज्ञातानि नरेन्द्रस्य कृत्वा कार्य्याणि भार्गव । अचिरेणापि विद्वेषं स मन्त्री त्वधिगच्छति । कुरुते यस्तु कार्य्याणि विदितानि महीपतेः भेदो न तस्य भवति कदाचिदपि भूभुजा एवंगुणो यस्य भवेत्तु मन्त्री वाक्ये च तस्याभिरतस्य राज्ञः । राज्यं स्थिरं स्याद्विपुला च लक्ष्मीर्यशश्च दीप्तं भुवनत्रयेऽपि" इति ।

**अमात्र** पु० नास्ति मात्रा परिच्छित्तिर्यस्य । १ इयत्ताशून्ये परमात्मनि तुरीये ब्रह्मणि । इयत्परिमाणकल्पनेन २ परिच्छेदशून्ये गगनादौ च त्रि० । अमात्रं त्वा धिषणं तत्विषे ऋ० १,१०२,७, "अमात्रं मात्रया इयत्तया रहितम्" भा० ।

**अमानना** स्त्री अभावे न०त० । आदराभावे न०ब० । आदरशून्ये त्रि० । [मनःकष्टदायके दुःखे ।

**अमानस्य** न० मानसे साधु न भवति मानस+यत् न०त० ।

**अमा(म)मासी** स्त्री अमा सह सूर्य्येण माः मासो वा चन्द्रमा यस्यां गौरा० ङीष् । अमावस्यायाम् ।

**अमाय** त्रि० नास्ति माया यस्य । १ कपटशून्ये २ अविद्याशून्ये ब्रह्मणि न० । मायोमानम् । ३ इयत्ताशून्ये त्रि० ।

**अमानिन्** त्रि० न मन्यतेऽभिमन्यते मन—णिनि न०त० । अभिमानशून्ये "अमानित्वमदम्भित्वम्" गीता ।

**अमार्जित** त्रि० मृज—क्त विरोधे न०त० । अपरिष्कृते ।

**अमा(वा)वसी** स्त्री अमा सह वसतश्चन्द्रार्कौ यस्याम् अप् घञ् वा नि० गौरा० ङीष् । अमावास्यायाम् ।

**अमाव(वा)स्या** अमा सह वसतश्चन्द्रार्कौ यस्याम् नि० । कृष्णपक्षीयपञ्चदशी तिथौ । तथा हि अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः, ऊर्द्ध्वप्रदेशवर्त्ती मन्दगामी सूर्य्यः । तयोर्गतिविशेषात् यत्काले चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलस्याधोभागे व्यवस्थितम् भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वात् चन्द्रमण्डलमीषदपि न दृश्यते इति कृष्णपक्षे पञ्चदशकलाक्रियाकूटोपलक्षितः कालः अमावस्येति निष्कर्षः । "सूर्य्याचन्द्रमसोः यः परो विप्रकर्षः सा पौर्णमासी यः परःसन्निकर्षः साऽमावस्येति" गोभि० "अमावस्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी" मनुः । अमावास्यायां भवः वा वुन् अमावास्यकः अण् आमावस्यः । तत्रभवे त्रि० । "य आगारे मृगयन्ते प्रतिक्रोशेऽमावास्ये" अथ० २६,३ ।

**अमावसु** पु० आयुपुत्रे ऋषिभेदे "अमावसुमिति ख्यातमायोः पुत्रं यशस्विनम्" हरिवं० ।

**अमित** त्रि० न मितः । १ अपरिच्छिन्ने इयत्ताशून्ये "अमितस्य हि दातारं भर्त्तारं का न पूजयेत्" ? रामा० । २ अज्ञाते च ।

**अमितविक्रम** पु० अमिता अपरिच्छिन्ना विक्रमाङ्कयः पाद-